DIAMOND MOUNTAIN UNIVERSITY

# संस्कृत

ADVANCED SANSKRIT
PART 2

# WEEK ONE

DIAMOND MOUNTAIN DIAMOND MOUNTAIN UNIVERSITY

Advanced Sanskrit, 1
Brian Smith (Ven. Sumati Marut) (brian.smith@ucr.edu)

# Winter Term, Class Schedule

**WEEK ONE: Tuesday, Feb. 1, 2007 1:00 – 4:00 PM**

A. Review quiz covering present verbal conjugations
B. Review of noun declensions (Whitney #321-474)
C. Introduction to Arya Nagarjuna's मूलमध्यमककारिका, chapter 9

**HOMEWORK FOR WEEK ONE:**

1. Review verbal conjugations and noun declensions in Whitney
2. For each of the verses below from Arya Nagarjuna's मूलमध्यमककारिका, provide a word by word English translation. In addition, identify for each word what grammatical part of speech it is. If it's a noun, identify its gender, case, and number (e.g., सद्भूतः, masculine, nominative, singular). If it's a verb, identify its verbal root, tense, voice, person and number (e.g. करोति, third person singular, present parasmaipadi, active, from the root कृ ).

## पूर्वपरीक्षा नाम नवमं प्रकरणं

दर्शनश्रवणादीनि वेदनादीनि चाप्यथ।
भवन्ति यस्य प्रागेभ्यः सो ऽस्तीत्येके वदन्त्युत॥ १

कथं ह्यविद्यमानस्य दर्शनादि भविष्यति।
भावस्य तस्मात्प्रागेभ्यः सो ऽस्ति भावो व्यवस्थितः॥ २

दर्शनश्रवणादिभ्यो वेदनादिभ्य एव च।

यः प्राग्व्यवस्थितो भावः केन प्रज्ञाप्यते ऽथ सः॥ ३

विनापि दर्शनादीनि यदि चासौ व्यवस्थितः।

अमून्यपि भविष्यन्ति विना तेन न संशयः॥ ४

अज्यते केन चित् कश्चित् किं चित्केन चिदज्यते।

कुतः किं चिद्विना कश्चित्किं चित्कं चिद्विना कुतः॥ ५

सर्वेभ्यो दर्शनादिभ्यः कश्चित्पूर्वो न विद्यते।

अज्यते दर्शनादिनामन्येन पुनरन्यदा॥ ६

सर्वेभ्यो दर्शनादिभ्यो यदि पूर्वो न विद्यते।

एकैकस्मात्कथं पूर्वो दर्शनादेः स विद्यते॥ ७

द्रष्टा स एव स श्रोता स एव यदि वेदकः।

एकैकस्माद्भवेत्पूर्वं एवं चैतन्न युज्यते॥ ८

द्रष्टान्य एव श्रोतान्यो वेदको ऽन्यः पुनर्यदि।
सति स्याद्द्रष्टरि श्रोता बहुत्वं चात्मनां भवेत्॥ ९

दर्शनश्रवणादीनि वेदनादीनि चाप्यथ।
भवन्ति येभ्यस्तेष्वेष भूतेष्वपि न विद्यते॥ १०

दर्शनश्रवणादीनि वेदनादीनि चाप्यथ।
न विद्यते चेद्यस्य स न विद्यन्त इमान्यपि॥ ११

प्राक् च यो दर्शनादिभ्यः सांप्रतं चोर्ध्वमेव च।
न विद्यते ऽस्ति नास्तीति निवृत्तास्तत्र कल्पनाः॥ १२